योगवासिष्ठः/प्रकरणम् १ (वैराग्यप्रकरणम्)/सर्गः ०३

अज्ञातलेखकः

भरद्वाज उवाच ।

जीवन्मुक्तस्थितिं ब्रह्मन्कृत्वा राघवमादितः ।

क्रमात्कथय मे नित्यं भविष्यामि सुखी यथा ।। १

श्रीवाल्मीकिरुवाच ।

भ्रमस्य जागतस्यास्य जातस्याकाशवर्णवत्।

अपुनःस्मरणं मन्ये साधो विस्मरणं वरम् ।। २

दृश्यात्यन्ताभावबोधं विना तन्नानुभूयते ।

कदाचित्केनचिन्नाम स्वबोधोऽन्विष्यतामतः ।। ३

स चेह संभवत्येव तदर्थमिदमाततम् ।

शास्त्रमाकर्णयसि चेत्तत्त्वमाप्स्यसि नान्यथा ।। ४

जगद्भ्रमोऽयं दृश्योऽपि नास्त्येवेत्यनुभूयते ।

वर्णो व्योम्न इवाखेदाद्विचारेणामुनाऽनघ ।। ५

दृश्यं नास्तीति बोधेन मनसो दृश्यमार्जनम् ।

संपन्नं चेत्तदुत्पन्ना परा निर्वाणनिर्वृतिः ।। ६

अन्यथा शास्त्रगर्तेषु लुठतां भवतामिह ।

भवत्यकृत्रिमाज्ञानां कल्पैरपि न निर्वृतिः ।। ७

अशेषेण परित्यागो वासनानां य उत्तमः ।

मोक्षं इत्युच्यते ब्रह्मन्स एव विमलक्रमः ।। ८

क्षीणायां वासनायां तु चेतो गलति सत्वरम् ।

क्षीणायां शीतसंतत्यां ब्रह्मन्हिमकणो यथा ।। ९

अयं वासनया देहो ध्रियते भूतपञ्जरः ।
तनुनान्तर्निविष्टेन मुक्तौघस्तन्तुना यथा ।। १०
वासना द्विविधा प्रोक्ता शुद्धा च मलिना तथा ।
मलिना जन्मनो हेतुः शुद्धा जन्मविनाशिनी ।। ११
अज्ञानसुघनाकारा घनाहंकारशालिनी।
पुनर्जन्मकरी प्रोक्ता मलिना वासना बुधैः ।। १२
पुनर्जन्माङ्कुरं त्यक्त्वा स्थिता संभृष्टबीजवत्।
देहार्थं ध्रियते ज्ञातज्ञेया शुद्धेति चोच्यते ।। १३
अपुनर्जन्मकरणी जीवन्मुक्तेषु देहिषु ।
वासना विद्यते शुद्धा देहे चक्र इव भ्रमः ।। १४
ये शुद्धवासना भूयो न जन्मानर्थभाजनम् ।
ज्ञातज्ञेयास्त उच्यन्ते जीवन्मुक्ता महाधियः ।। १५
जीवन्मुक्तिपदं प्राप्तो यथा रामो महामतिः ।
तत्तेऽहं शृणु वक्ष्याभि जरामरणशान्तये ।। १६
भरद्वाज महाबुद्धे रामक्रममिमं शुभम् ।
शृणु वक्ष्यामि तेनैव सर्वं ज्ञास्यसि सर्वदा ।। १७
विद्यागृहाद्विनिष्क्रम्य रामो राजीवलोचनः ।
दिवसान्यनयद्गेहे लीलाभिरकुतोभयः ।। १८
अथ गच्छति काले तु. पालयत्यवनिं नृपे ।
प्रजासु वीतशोकासु स्थितासु विगतज्वरम् ।। १९
तीर्थपुण्याश्रमश्रेणीर्द्रष्टुमुत्कण्ठितं मनः ।
रामस्याभूद्भृशं तत्र कदाचिद्गुणशालिनः ।। २०
राघवश्चिन्तयित्वैवमुपेत्य चरणौ पितुः ।
हंसः पद्माविव नवौ जग्राह नखकेसरौ ।। २१
श्रीराम उवाच ।
तीर्थानि देवसद्मानि वनान्यायतनानि च ।

द्रष्टुमुत्कण्ठितं तात ममेदं नाथ मानसम् ।। २२

तदेतामर्थितां पूर्वां सफलां कर्तुमर्हसि ।

न सोऽस्ति भुवने नाथ त्वया योऽर्थी न मानितः ।। २३

इति संप्रार्थितो राजा वसिष्ठेन समं तदा ।

विचार्यामुञ्चदेवैनं रामं प्रथममर्थिनम् ।। २४

शुभे नक्षत्रदिवसे भ्रातृभ्यां सह राघवः ।

मङ्गलालंकृतवपुः कृतस्वस्त्ययनो द्विजैः ।। २५

वसिष्ठप्रहितैर्विप्रैः शास्त्रज्ञैश्च समन्वितः ।

स्निग्धैः कतिपयैरेव राजपुत्रवरैः सह ।। २६

अम्बाभिर्विहिताशीभिरालिङ्ग्यालिङ्ग्य भूषितः ।

निरगात्स्वगृहात्तस्मात्तीर्थयात्रार्थमुद्यतः ।। २७

निर्गतः स्वपुरात्पौरैस्तूर्यघोषेण वादितः ।

पीयमानः पुरस्त्रीणां नेत्रैर्भृङ्गौघभङ्गुरैः ।। २८

ग्रामीणललनालोलहस्तपद्मापनोदितैः ।

लाजवर्षैर्विकीर्णात्मा हिमैरिव हिमाचलः ।। २९

आवर्जयन्विप्रगणान्परिशृण्वन्प्रजाशिषः ।

आलोकयन्दिगन्तांश्च परिचक्राम जाङ्गलान् ।। ३०

अथारभ्य स्वकात्तस्मात्क्रमात्कोशलमण्डलात् ।

स्नानदानतपोध्यानपूर्वकं स ददर्श ह ।। ३१

नदीतीराणि पुण्यानि वनान्यायतनानि च ।

जङ्गलानि जनान्तेषु तटान्यब्धिमहीभृताम् ।। ३२

मन्दाकिनीमिन्दुनिभां कालिन्दीं चोत्पलामलाम् ।

सरस्वतीं शतद्रूं च चन्द्रभागामिरावतीम् ।। ३३

वेणीं च कृष्णवेणीं च निर्विन्ध्यां सरयूं तथा ।

चर्मण्वतीं वितस्तां च विपाशां बाहुदामपि ।। ३४

प्रयागं नैमिषं चैव धर्मारण्यं गयां तथा। ।

वाराणसीं श्रीगिरिं च केदारं पुष्करं तथा ।। ३५

मानसं च क्रमसरस्तथैवोत्तरमानसम्।

वडवावदनं चैव तीर्थवृन्दं स सादरम्।। ३६

अग्नितीर्थं महातीर्थमिन्द्रद्युम्नसरस्तथा ।।

सरांसि सरितश्चैव तथा नदह्रदावलीम्।। ३७

स्वामिनं कार्तिकेयं च शालग्रामं हरिं तथा ।

स्थानानि च चतुःषष्टिं हरेरथ हरस्य च ।। ३८

नानाश्चर्यविचित्राणि चतुरब्धितटानि च ।

विन्ध्यमन्दरकुञ्जांश्च कुलशैलस्थलानि च ।। ३९

राजर्षीणां च महतां ब्रह्मर्षीणां तथैव च ।

देवानां ब्राह्मणानां चे पावनानाश्रमाञ्छुभान् ।। ४०

भूयोभूयः स बभ्राम भ्रातृभ्यां सह मानदः।

चतुर्ष्वपि दिगन्तेषु सर्वानेव महीतटान् ।। ४१

अमरकिन्नरमानवमानितः

समवलोक्य महीमखिलामिमाम् ।

उपययौ स्वगृहं रघुनन्दनो

विहृतदिक् शिवलोकमिवेश्वरः ।। ४४

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये वैराग्यप्रकरणे तीर्थयात्राकरणं नाम तृतीयः सर्गः।।३।।